तत्र कस्यागन्तोः को निजो दोष इत्यपेक्षायामाह ।

"कामशोकभयाद्वायुः क्रोधात् पित्तं त्रयो मलाः।
भूताभिषङ्गात् कुप्यन्ति भूतसामान्यलक्षणाः ॥"

कामशोकभयात् कामशोकभयजादागन्तोर्वायुः कुप्यति। क्रोधात् क्रोधजादागन्तोः पित्तं कुप्यति। भूताभिषङ्गात् भूतावेशजादागन्तोः त्रयो मला दोषाः कुप्यन्ति इत्यर्थः। भूतसामान्यलक्षणाः भूतस्य भूतलक्षणस्य सामान्यं समानता येषां तानि भूतसामान्यानि भूतसामान्यानि लक्षणानि येषां ते भूतसामान्यलक्षणाः मलाः ॥ * ॥

अथागन्तुज्वराणां हेतुभेदैर्लक्षणभेदानाह ।

"श्यावास्यता विषकृते तथातीसार एव च।
भक्तारुचिः पिपासा च तोदश्च सह मूर्च्छया ॥"

विषकृते स्थावरजङ्गमविषभक्षणकृते ज्वरे। श्यावः शुक्लानुविद्धः कृष्णो वर्णः शाकवर्णो वा। अतीसारः स्थावरविषेणैव तस्याधोगामित्वात्। तोदः सूचीव्यधनेनेव व्यथा ॥ *

"ओषधीगन्धजे मूर्च्छा शिरोरुग्वमथुस्तथा।
कामजे चित्तविभ्रंशस्तन्द्रालस्यमभोजनम् ॥
हृदये वेदना चास्य गात्रञ्च परिशुष्यति ॥"

कामजे समीहितकान्ताद्यप्राप्तिनिमित्तके ज्वरे। चकारात् वाग्भटोक्तान्यपि लक्षणानि बोद्धव्यानि। तानि यथा,—

"कामाद्भ्रमोऽरुचिर्दाहो ह्रीनिद्राधीधृतिक्षयः।
भयात् प्रलापः शोकाच्च भवेत् कोपाच्च वेपथुः ॥"

भयात् भयजे ज्वरे प्रलापः। शोकाच्च चकारेण प्रलाप एवानुकृष्यते। कोपाच्च कोपादपि वेपथुर्भवति ॥ * ॥ ननु वेपथुर्वातस्य धर्म्मः तत् कथं क्रोधजे ज्वरे वेपथुः। यत उक्तम्। क्रोधात् पित्तमिति। उच्यते।

"एकः प्रकुपितो दोष इतरानपि कोपयेत् ॥"

इति वचनात् पित्तकोपितवातजन्य एवात्र वेपथुः ॥ * ॥ किञ्च क्रोधाद्वायुरपि भवति। यत उक्तं विदेहेन। क्रोधशोकौ स्मृतौ वातपित्तरक्तप्रकोपनाविति। यत उक्तम्।

"भूताभिषङ्गादुद्वेगो हास्यं रोदनकोपने।
केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम् ॥"

भूताभिषङ्गोत्थो विषमज्वरो भवति। कदाचिदपि वेगवान् कदाचिच्छान्तवेग इत्यर्थः ॥

"अभिचाराभिशापाभ्यां मोहस्तृष्णा च जायते।"

तृष्णा चेति चकारेण हारीतानुवादि वाग्भटोक्तञ्च बोद्धव्यम्। तद्यथा,—

"अत्राभिचारिकैर्मन्त्रैर्हूयमानस्य तप्यते।
पूर्व्वं मनस्ततो देहस्ततो विस्फोटविभ्रमैः।
सदाहमूर्च्छाग्रस्तस्य प्रत्यहं वर्द्धते ज्वर इति ॥"

अथ तेषां चिकित्सा।

"आगन्तुजे ज्वरे नैव नरः कुर्व्वन्ति लङ्घनम् ॥"

तथा च वाग्भटः।

"शुद्धवातक्षयागन्तुजीर्णज्वरिषु लङ्घनम् ॥"

नेष्यते इति शेषः। अन्यच्च।

"लङ्घनं न हितं कामशोकचिन्ताश्रहारजे।
भयभूतश्रमक्रोधलङ्घनैश्च कृते ज्वरे ॥
किन्तु दीप्ताग्नये तत्र दद्यान्मांसरसौदनम्।
अभिघातज्वरे युञ्ज्यात् क्रियामुष्णविवर्ज्जिताम् ॥
कषायं मधुरं स्निग्धं यथादोषमथापि वा।
अभिघातज्वरो नश्येत् पानाभ्यङ्गेन सर्पिषः ॥
रक्तावसेकैर्म्मध्यैश्च तथा मांसरसौदनैः ॥"

मेध्यैर्म्मेधाय हितैः ॥ * ॥

"अध्वबन्धश्रमात्यध्वभङ्गभ्रंशसमुद्भवान्।
ज्वरानुपाचरेत् पूर्व्वं क्षीरमांसरसौदनैः ॥"

अधस्ताडनं कर्णादिवेधो वा। भङ्गश्छेदभेदादिकः। भ्रंशो दृक्षादितः पतनम् ॥ * ॥

"अध्वश्रान्तेषु चाभ्यङ्गं दिवानिद्राञ्च कारयेत्।
ओषधीगन्धविषजौ विषपित्तप्रबाधनैः।
जयेत् कषायैर्म्मतिमान् सर्व्वगन्धकृतैर्भिषक् ॥"

सर्व्वगन्धमाह।

"चातुर्जातककर्पूरकक्कोलागुरुकुङ्कुमम्।
लवङ्गसहितञ्चैव सर्व्वगन्धं विनिर्द्दिशेत् ॥ * ॥
क्रोधजे पित्तजे काम्ये नार्य्याः सद्वाक्यमेव च।
आश्वासेनेष्टलाभेन वायोः प्रशमनेन च ॥
हर्षणैश्च शमं यान्ति कामशोकभयज्वराः।
कामैरथ मनोज्ञैश्च पित्तघ्नैश्चाप्युपक्रमैः ॥
सद्वाक्यैश्च शमं याति ज्वरः क्रोधसमुत्थितः ॥"

कामैः कामावेशैः। मनोज्ञैः धिक्कारादिभिर्भयजनकवचनैर्वा ॥ * ॥

"कामात् क्रोधज्वरो नश्येत् क्रोधात् कामज्वरस्तथा।
याभ्यां ताभ्यामुभाभ्याञ्च भयशोकसमुद्भवः ॥"

घातिताभ्यामुभाभ्यां मनसि निगृहीताभ्यां कामक्रोधाभ्याम् ॥ * ॥

"भूतविद्यासमुद्दिष्टैर्बन्धावेशनताडनैः।
जयेद्भूताभिषङ्गोत्थं मनःसान्त्वैश्च मानसम् ॥"

ताडनैरित्यस्य स्थाने केचित् पूजनैरिति पठन्ति ॥

"सहदेवाया मूलं विधिना कण्ठे निबद्धमपहरति।
एकद्वित्रिचतुर्भिर्द्दिवसैर्भूतज्वरं पुंसाम् ॥
अभिचाराभिशापोत्थौ ज्वरौ होमादिभिर्जयेत्।
दानस्वस्त्ययनातिथ्यैरुत्पातग्रहदुःखजौ ॥"

इत्यागन्तुज्वराधिकारः ॥ * ॥

अथ विषमज्वराधिकारमाह। तत्र विषमज्वरस्य निदानादिचिकित्सापर्य्यन्तं विषमज्वरशब्दे द्रष्टव्यम् ॥ * ॥

अथ जीर्णज्वराधिकारः। तस्य निदानादिकं जीर्णज्वरशब्दे द्रष्टव्यम् ॥ * ॥

अथ दुर्ब्बलजनितस्य ज्वरस्य चिकित्सामाह।

"हरीतकी निम्बपत्रं नागरं सैन्धवोऽनलः।
एषां चूर्णं सदा खादेत् दुर्ब्बलज्वरशान्तये ॥"

इति हरीतक्यादि चूर्णम् ॥ * ॥

"अरुचिमनलमान्द्यं पीनसश्वासकासमुदरमुदकदोषानाशु हन्यादशेषान्।
जनयति तनुकान्तिं चित्तवैमल्यसारं पलपरिमितशुण्ठीधीरसिद्धः कषायः ॥"

इति शुण्ठीक्वाथः ॥ * ॥

"विषं भागद्वयं दग्धकपर्द्दः पञ्चभागकः।
मरिचं नवभागञ्च चूर्णं वस्त्रेण शोधयेत् ॥
आर्द्रकस्य रसेनास्य कुर्य्यान्मुद्गनिभां वटीम्।
वारिणा वटिकाद्वन्द्वं प्रातः सायञ्च भक्षयेत् ॥
अयं रसो ज्वरे योज्यः सामे दुर्ब्बलकेऽपि च।
अजीर्णाध्मानविष्टम्भशूलेषु श्वासकासयोः ॥"

इति दुर्ब्बलजेता रसः ॥ * ॥

"पटोलमुस्तामृतवल्लिवासकं
सनागरं धान्यकिराततिक्तकम्।
कषायमेषां मधुना पिबन्नरो
निवारयेत् दुर्ब्बलदोषमुल्बणम् ॥"

इति पटोलादिक्वाथः ॥ * ॥

"किराततिक्तत्रिवृदम्बुपिप्पली-
विडङ्गविश्वाकटुरोहिणीरजः।
निहन्ति लीढं मधुनातिसत्वरं
सुदुस्तरं दुर्ब्बलदोषजं ज्वरम् ॥"

इति किराततिक्तादिचूर्णम् ॥ * ॥

"भोजनादौ नरैर्भुक्तं शुण्ठीराज्यभयोत्थितम्।
कल्कं तु सहते नित्यं नानादेशोद्भवं जलम् ॥
महार्द्रकयवक्षारौ पीत्वा चोष्णेन वारिणा।
नानादेशसमुद्भूतंवारिदोषमपोहति ॥" * ॥

अथ साध्यस्य ज्वरस्य लक्षणमाह।

"बलवत्स्वपि दोषेषु ज्वरः साध्योऽनुपद्रवः ॥"

ज्वरस्योपद्रवानाह।

"श्वासमूर्च्छारुचिच्छर्द्दितृष्णातीसारविड्ग्रहाः।
हिक्काकासाङ्गभेदाश्च ज्वरस्योपद्रवा दश ॥" * ॥

प्रसङ्गादुपद्रवाणां चिकित्सायां विशेषमाह।

"संजातोपद्रवो व्याधिस्त्वाद्यो न स्याच्चिकित्सकैः।
व्याधौ शान्ते प्रशाम्यन्ति सद्यः सर्व्वेऽप्युपद्रवाः ॥
अतो व्याधिं जयेद्यत्नात् पूर्व्वं पश्चादुपद्रवम्।
भिषग्यः कुशलः शीघ्रं जयेत् पूर्व्वमुपद्रवम् ॥
तेष्वपि प्रचुरेषु प्राक्शमयेदाशुकारिणम्।
मूलव्याधिं जयेत् पूर्वं जेतो यो वा भवेद्बली ॥
अविरोधेन वा कुर्य्यादुभयोरपि च क्रियाम् ॥"

तत्र ज्वरे श्वासस्य चिकित्सा।

"सिंही व्याघ्री ताम्रमूली पटोली
शृङ्गी पद्मा पुष्करं रोहिणी च।
भार्गी शट्या शैलमल्लाश्च बीजं
श्वासं हन्यात् सन्निपाते दशाङ्गः ॥"

सिंही वड्ढकटैया। व्याघ्री कटैया। ताम्रमूली दुरालभा। पद्मा भार्गी। रोहिणी कटुकी। शैलमल्ली कोरैया। इति दशाङ्गो योगः ॥ * ॥

"भार्गीनिम्बघनाभयामृतलताभूनिम्बवासाविषाचायन्तीकटुकावचात्रिकटुकश्योनाकशक्रद्रुमैः।
रास्नायासपटोलपाटलिशटीदार्व्वीविशालात्रिवृद्ब्राह्मीपुष्करसिंहिकाद्वयनिशाधात्र्याग्रदेवद्रुमैः ॥
क्वाथोऽयं खलु सन्निपातनिवहान् द्वात्रिंशतां पानतो।
दुर्द्धर्षांक्लिन्नदेहस्या विजयते सर्पान् गरुत्मानिव